दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-3 ■ वर्ष-4 ■ अङ्क-137 | 1 | मार्च 17, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्दः ५१२५ वसन्त-ऋतुः
सूर्यः उत्तरायणः चैत्र कृष्ण तृतीया
तिथिः चैत्र 4 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलाय २६८३ किलोमीटलदीर्घमार्गाणां २२ सेतुनां च २५४ परियोजनानां कृते अनुमोदनम्

3 अमेरिकादेशे पाकिस्तानीनां कृते 'प्रवेशः नास्ति'

3 उपनिषद्-रहस्यम्- 01 ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।। ॐ शान्तिः शान्तिः शान्तिः!

## सुभाषितम्

**उदये सविता रक्तो,
रक्तश्चास्तमये तथा।
सम्पत्तौ च विपत्तौ च,
महतामेकरूपता॥**

जिस प्रकार उदय के समय सूर्य रक्त (लाल) होता है और अस्त के समय भी रक्त (लाल) होता है, उसी प्रकार सज्जन व्यक्ति (महापुरुष) सुख (अच्छे समय) और दुःख (बुरे समय) में समान रहते हैं।

# नवदिल्लीं सम्प्राप्तः न्यूज़ीलैण्डदेशस्य प्रधानमन्त्री क्रिस्टोफर लक्सनः

हिमसंस्कृतवार्ताः। न्यूज़ीलैण्डदेशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन इत्येषः पञ्चदिवसात्मिकायै भारतयात्रायै नवदिल्लीं सम्प्राप्तः। तेन सह उच्चस्तरीय प्रतिनिधिमण्डलमपि समागतम्, मण्डलेऽस्मिन् मन्त्रिणः, वरिष्ठाधिकारिणः, व्यापारिणः, वार्ताहराः सहैव भारतीय-प्रवासी-समुदायस्य सदस्याः सन्ति। विदेशमन्त्रालयेन स्वीय-वक्तव्यमाध्यमेन विज्ञापितं यत् प्रधानमन्त्री नरेन्द्र मोदी अद्य नवदिल्ल्यां न्यूज़ीलैण्डदेशस्य प्रधानमन्त्रिणा क्रिस्टोफर लक्सन इत्यमुना सह पञ्चविंशत्युत्तर-द्विसहस्रतमस्य रायसीना-संवादस्य उद्घाटनं विधास्यति। रायसीना-संवादस्य दशमं संस्करणम् अद्य आरभ्य मार्चमासस्य एकोनविंशति-दिनाङ्कं यावत् प्रचलिष्यति। श्रीमोदी न्यूज़ीलैण्डदेशस्य स्वीयसमकक्षेण सह भारत-न्यूज़ीलैण्डदेशयोः विभिन्नपक्षानाश्रित्य चर्चां साधयिष्यति। श्री लक्सन दशमस्य रायसीना-संवादस्य उद्घाटनसत्रे मुख्यातिथित्वेन भागं भजिष्यति। असौ राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदी-मुर्मुः इत्यनया सहापि मेलिष्यति।

## हाइपरलूप्-परीक्षणनली एशियायाः दीर्घतमा हाइपरलूप्-परीक्षणसुविधा अस्ति-केन्द्रीय-रेल-सूचनाप्रसारणमन्त्री



केन्द्रीय-रेल-सूचनाप्रसारण-सूचनाप्रौद्योगिकी-मन्त्री श्री-अश्विनी-वैष्णवः उक्तवान् यत् आई.आई.टी-चेन्नै इत्यत्र दशोत्तर-चतुश्शत-मीटरात्मिका दीर्घतमा हाइपरलूप्-परीक्षणनली एशियायाः दीर्घतमा हाइपरलूप्-परीक्षणसुविधा अस्ति, यद्धि शीघ्रमेव विश्वस्य दीर्घतमा-परीक्षणसुविधा च भविष्यति। श्रीवैष्णवः परह्यः एव आई.आई.टी-मद्रास-डिस्कवरी-परिसरे हाइपरलूप्-परीक्षणसुविधायाः भ्रमणकाले दृष्टस्य सजीव-प्रदर्शनस्य दृश्य-चलचित्रं सामाजिकमाध्यमेषु प्रकाशयन् एतां सूचनां प्रदत्तवान्। सः विश्वासं प्रकटितवान् यत् भारतं शीघ्रमेव हाइपरलूप्-परिवहनार्थं सज्जीभविष्यति, यतो हि सम्प्रति विकासाधीनायाः प्रौद्योगिक्याः अद्यावधि कृतेषु परीक्षणेषु आशाजनकः परिणामः प्राप्तः।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

# उड़ियासाहित्यस्य अतीवप्रथितः कविषु अन्यतमः समवाप्त-पद्मभूषण-पुरस्कारः रमाकान्त-रथमहोदयः दिवङ्गतः




हिमसंस्कृतवार्ताः। उड़ियासाहित्यस्य अतीवप्रथितः आधुनिकतावादी-कविषु अन्यतमः समवाप्त-पद्मभूषणपुरस्कारः रमाकान्त-रथमहोदयः गतप्रातः भुवनेश्वरे एकनवतितमे वयसि दिवङ्गतः। तस्य निधनेन सम्पूर्णमपि साहित्यजगत् शोकान्धकारेण व्यापृतमस्ति। सप्तपञ्चाशदुत्तर-एकोनविंशतितमस्य आई-ए-एस-अधिकारी रमाकान्त-रथः ओडिशायाः मुख्यसचिवत्वेन सेवाकार्यम् अनुष्ठितवान् सहैव केन्द्र-सर्वकारस्यापि विविधेषु पदेषु कार्यरतस्सन् तेन स्वकीयं योगदानं प्रदत्तम्। तेन अष्टनवत्युत्तर एकोनविंशतिवर्षादारभ्य त्र्यधिक-द्विसहस्रतमवर्षं यावत् भारतीय-साहित्याकादम्यां अध्यक्षरूपेणापि कार्यं कृतम्। राष्ट्रपतिपदासीना द्रौपदीमुर्मुः प्रख्यात-उड़ियाकवेः रमाकान्तरथस्य निधनमालक्ष्य दुःखं प्रकटितवती। स्वकीये सन्देशे राष्ट्रपतिना कथितं यत् रमाकान्त-रथः भारतीय साहित्यजगतः कश्चन प्रमुखः व्यक्तिः आसीत्। राष्ट्रपतिना प्रोक्तं यत् प्रख्यातकविना उड़ियासाहित्ये अविस्मरणीय योगदानेन अखिल भारतीय-साहित्यं समेधितम्। ओडिशायाः मुख्यमन्त्रिणा मोहन-चरण-माझी इत्यमुनापि रमाकान्त-रथमहोदयस्य निधनमालक्ष्य स्वकीयः सन्तापः प्रकटीकृतः। तेन प्रख्यापितं यत् रमाकान्तमहोदयेन राष्ट्रीयान्ताराष्ट्रीय-स्तरे ओडियासाहित्यस्य गौरवं संवर्धितम्। केन्द्रीयमन्त्री धर्मेन्द्र प्रधानः, जुएल ओराम, सहैव अन्ये गणमान्याश्चापि रमाकान्तमहोदयस्य निधनमालक्ष्य शोकं प्रकटितवन्तः।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## अन्तरिक्षे अवरुद्धयोः सुनीता विलियम्स बुच-विल्मोर इत्यनयोः अन्ताराष्ट्रीय-अन्तरिक्ष-स्थानके प्रवेशः

अन्तरिक्षे अवरुद्धयोः सुनीता विलियम्स बुच-विल्मोर इत्यनयोः प्रत्यानयनाय स्पेस-एक्स-क्रू-दशमाभियानस्य अन्तरिक्षयात्रिभिः सफलडॉकिंग-प्रक्रिया सम्पाद्य अन्ताराष्ट्रीय-अन्तरिक्ष-स्थानके प्रवेशो विहितः। एतस्मिन् अभियाने चतुर्णां अन्तरिक्ष-यात्रिणां दलं प्रेषितमस्ति। यत्र नासायाः ऐनी-मैकक्लेन, निकोल एयर्स इत्येतौ, जाक्सायाः अन्तरिक्षयात्री ताकुआ-ओनिशी सहैव रोस्कोस्मोस इत्यस्य किरिल-पेस्कोव इत्येते सन्ति। एतेषां गतदिने एक्सपेडिशन-द्विसप्ततिः इत्यस्य चालकेन स्वागतं विहितम्।

# बलूचिस्तानप्रान्ते प्रचण्डगोलिकाप्रहारेण न्यूनातिन्यूनं द्वादश-पाकिस्तानीसैनिकाः मृताः

**हिमसंस्कृतवार्ताः बलूचिस्तान।** बलूचिस्तानप्रान्तस्य नोश्की इत्यत्र एन-चत्वारिंशत् इति राजमार्गे, रक्षानी-मिल-क्षेत्रे, फ्रन्टियर-कॉन्स्टेबुलरी इति सैनिकान् वहन्तस्य बसयानस्य उपरि प्रचण्डगोलिकाप्रहारेण न्यूनातिन्यूनं द्वादश-पाकिस्तानीसैनिकाः मृताः, षड्विंशत्यधिकाः व्रणिताश्च अभवन् । आक्रमणस्यानन्तरं चिकित्सालयेषु आपत्कालीनपरिहाराः प्रचालिताः, एफ.सी-मुख्यालयस्य अन्तर्बहिश्च एम्बुलेन्स-यानानि च दृष्टानि। बी.एल.ए. इति बलोच्-मुक्तिसेनया, पाकिस्तानि-सेनायाः समूहोपरि घातकप्रहारस्य उत्तरदायित्वं स्वीकृत्य, अद्यावधि न्यूनातिन्यूनं नवति-सैन्यकर्मचारिणः मारिताः इति उद्घोषितम् । पाकिस्तानस्य सैन्याधिकारिणः एतावत्पर्यन्तं बीएलए-इत्यस्य नूतन-घोषणायाः कृते प्रतिक्रियां न दत्तवन्तः।

## असमराज्यस्य कोकराझार-स्थलं सम्प्राप्तवान् केन्द्रीय-गृहसहकारितामन्त्री




केन्द्रीय-गृहसहकारितामन्त्री अमितशाहः असमराज्यस्य कोकराझार-स्थलं सम्प्राप्तवान्। बोडो-प्रादेशिकक्षेत्रे निवसद्भिः विविध सांस्कृतिकदलैः स्वीयसांस्कृतिक-परम्परायाः प्रदर्शनपूर्वकं श्रीशाहस्य स्वागतमाचरितम्। श्रीशाहः मिज़ोरम-यात्रानन्तरं गुवाहाटीस्थलस्य लोकप्रिय-गोपीनाथ-बोरदोलोई-अन्ताराष्ट्रीय विमानपत्तने अगच्छत् यत्र असमस्य मुख्यमन्त्री डॉक्टर हिमन्ता-बिस्व-सरमा अन्ये गणमान्याश्च तस्य स्वागतं कृतवन्तः।

# हिमाचलाय २६८३ किलोमीटलदीर्घमार्गाणां २२ सेतुनां च २५४ परियोजनानां कृते अनुमोदनम्

**हिमसंस्कृतवार्ता:- नवदेहली।** केन्द्रीयमार्गपरिवहनमन्त्री नितिनगडकरी इत्यनेन संसदि काङ्ग्ड़ासांसदाय राजीवभारद्वाजाय उक्तवान् यत् प्रधानमन्त्री- ग्रामीण- सड़क-योजनायाः (PMGSY) अन्तर्गतं हिमाचलप्रदेशे २०२३-२४ वर्षे २६८३ किलोमीटरदीर्घमार्गाणां २२ सेतूनां च २५४ सड़कपरियोजनानाम् अनुमोदनं कृतम् अस्ति। अस्मिन् कालखण्डे प्रधानमन्त्री- ग्रामीण- सड़कयोजनायाः अन्तर्गतं काङ्ग्ड़ामण्डले अधिकतमं सड़कपरियोजनानाम् अनुमोदनं कृतम् अस्ति, लाहौलस्पीतौ न्यूनतमा सड़कपरियोजनानां अनुमोदनं कृतम्।

## काङ्ग्ड़ा मण्डलाय सर्वाधिकाः परियोजनाः

केन्द्रीयपरिवहनमन्त्री सूचितवान् यत् बिलासपुरमण्डले १८५ किलोमीटरदीर्घतायाः १९ मार्गपरियोजनानाः, चम्बायां १६७ किलोमीटरदीर्घतायाः एकेन सेतुना साकं १७ मार्गपरियोजनाः, हमीरपुरे १७८ किलोमीटरदीर्घतायाः २१ परियोजनाः, काङ्ग्ड़ायां ५०२ किलोमीटरदीर्घतायाः मार्गाणां पञ्च सेतूनां च ५५ परियोजनाः, कुल्लू जनपदे १०३ किलोमीटरदीर्घतायाः एकसेतोः च १० परियोजनाः, लाहौल-स्पीतौ ६४ किलोमीटरदीर्घतायाः सप्त परियोजनाः मण्ड्यां ३२२ किलोमीटरदीर्घतायाः २३ परियोजनाः, शिमलायां ५४९ किलोमीटरदीर्घतायाः ४६ परियोजनाः, सिरमौरे १६३ किलोमीटरदीर्घतायाः १२ परियोजनानाः,





सोलने २९१ किलोमीटरदीर्घतायाः मार्गाणां चतुर्सेतूनां च २५ परियोजनाः, ऊनायां १५९ किलोमीटरदीर्घतायाः मार्गाणां ११ सेतूनां च १९ परियोजनाः अनुमोदिताः सन्ति। सः सूचितवान् यत् ग्रामीण- मूलसंरचना- विकासयोजनायाः अन्तर्गतं वर्षे २०२३-२४ मध्ये प्रधानमन्त्रिमार्गयोजनायाः अन्तर्गतं कस्यापि परियोजनायाः कृते नाबार्डेन आर्थिकसहायता न दत्ता

# प्रायः षड्दिनेभ्यः अदृश्यः अस्ति राज्यविद्युत्निगमस्य मुख्या अभियंता, तस्य पत्नी आरोपान् कृतवती



**हिमसंस्कृतवार्ता:- शिमला।** राज्यविद्युत्निगमस्य लुप्तः मुख्य अभियंता, महाप्रबन्धकः विमलगुप्ता इत्यस्य पत्नी किरणनेगी इत्यनया वरिष्ठाधिकारीणां मानसिक उत्पीडनस्य दुर्व्यवहारस्य च आरोपः कृतः। अस्मिन् विषये मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यस्मै पत्रं लिखितं यत् १० मार्चतः लुप्तः स्वपतिं विमलनेगीं अन्वेष्टुं अनुरोधः कृतः। किरण नेगी अपि स्वपतिविषये यः सूचनां ददाति तस्मै एकलक्षरूप्यकाणां पुरस्कारस्य घोषणां कृतवती।

मुख्यमन्त्रिणं प्रति प्रेषितपत्रे किरणनेगी अवदत् यत् मम पतिः अभियंता विमलनेगी, यः सम्प्रति हिमाचलप्रदेश- विद्युत्निगमलिमिटेड इत्यत्र कार्यं कुर्वन् अस्ति, सः २०२५ तमस्य वर्षस्य मार्चमासस्य १० दिनाङ्कात् शिमलातः लुप्तः अस्ति। तस्य लुप्ततायाः विषये प्राथमिकी थानासदर शिमलायां प्रवेशिता अस्ति। विमल नेगी इत्यस्य द्वौ मोबाईल संख्ये स्तः ये मार्चमासस्य १० दिनाङ्कात् निष्क्रियाः सन्ति। बिलासपुरमण्डलस्य घुमारवीं-नगरस्य कन्दरौर- सेतुसमीपे अन्तिमे वारं पतिः दृष्टः। किरण नेगी अकथयत् यत् मम लुप्तः पतिः विमल नेगी गतषण्मासात् मानसिकविक्षिप्तः अस्ति। सः कथयति यत् विद्युत्निगमस्य वरिष्ठाः अधिकारिणः तस्य मानसिकरूपेण अनावश्यकरूपेण उत्पीडनं कुर्वन्ति स्म, तेन सह दुर्व्यवहारं कुर्वन्ति स्म, ज्ञात्वा चिकित्सा- अवकाशं न ददति स्म, प्रशासनिक- कार्याणि करिष्यामि इति पुनः पुनः संतर्जनाम् अपि ददति स्म। सः अवदत् यत् विमलनेगी २०२५ तमस्य वर्षस्य मार्चमासस्य १० दिनाङ्के कार्यालयसमये कार्यालयात् लुप्तः अभवत्। तस्य अन्तर्धानस्य विषये अस्मान् अद्यापि कस्यचित् अधिकारिणा कर्मचारिणा वा आधिकारिकतया न सूचिताः। किरण नेगी इत्यनेन उक्ताधिकारिणां विरुद्धं कठोर- वैधानिक- प्रशासनिक- कार्याणि करणीयानि इति आग्रहः कृतः। तेषां अन्वेषणार्थं वरिष्ठपुलिसपदाधिकारिणः निरीक्षणे विशेषकार्यदलस्य निर्माणं करणीयम्।

अपरपक्षे विद्युत्मण्डलस्य अभियतॄणां कर्मचारिणां च संयुक्तमोर्चा अपि मुख्यमन्त्रिणं अस्मिन् विषये हस्तक्षेपं कर्तुम् आग्रहं कृतवान्। मोर्चा संयोजकौ लोकेशठाकुरः हीरालालवर्मा च अस्य विषयस्य विस्तरेण अन्वेषणं करणीयम् इति अवदताम्।

# सुक्खु-सर्वकारः विधिव्यवस्थां निर्वोढुम् असफलः, बलात्कार-हत्यादि घटनाः प्रतिदिनं भवन्ति- विपिनपरमारः



**हिमसंस्कृतवार्ता: - धर्मशाला।** पूर्वविधानसभाध्यक्षः भाजपाविधायकः च विपिनसिंहपरमारः राज्यस्य विधिव्यवस्थायाः क्षीणतां प्राप्य राज्यसर्वकारे आक्रमणं कृतवान्। विपिनसिंह परमारेण विज्ञप्तिः प्रसार्य उक्तं यत् राज्ये आतङ्कवादस्य वातावरणं वर्धमानम् अस्ति। विधिव्यवस्था सर्वथा पतिता अस्ति। सुक्खुसर्वकारः विधिव्यवस्थां निर्वोढुम् सर्वथा असफलः अभवत्। राज्ये गोलीकाण्डः, बलात्कारः, हत्याः च सामान्याः भवन्ति। जनाः भीताः सन्ति, सर्वकारः च शिथिलः अस्ति। सः अवदत् यत् सर्वकारस्य विफलतायाः कारणात् बिलासपुरे गोलीकाण्डादिः घटनाः अभवन्। बिलासपुरे दिवा प्रकाशे एवं प्रकारेण गोलिकाप्रहारः प्रथमवारं न अस्ति। पूर्वं अपि एतादृशी घटना घटिता आसीत् यत्र पुलिसैः कठोरकार्यविधिः न कृता। यदि समये पुलिसैः कठोरकार्याणि कृतानि स्यात् तर्हि एताः गोलीकाण्डस्य घटनाः न भवन्ति स्म, राज्ये एतादृशाः अपराधिकक्रियाकलापाः नियन्त्रिताः भवन्ति स्म। अस्मिन् विषये सर्वकारेण कठोरकार्याणि कर्तव्यानि येन राज्ये अपराधिनः तत्त्वानि नियन्त्रयितुं शक्यन्ते इति सः अवदत्। एतस्य विषयस्य गम्भीरतापूर्वकं अन्वेषणं करणीयम्, अस्मिन् प्रकरणे दोषी सर्वेषाम् अपराधिनां विरुद्धं विधानानुसारं कार्यविधिः करणीया। अस्याः घटनायाः पृष्ठतः कारणं तस्य षड्यंत्रस्य समग्रकथा च प्रकाशनीया। अपराधिनां विरुद्धं कठोरतमं कार्यं कर्तव्यं यथा पुनः कोऽपि एतादृशं कार्यं कर्तुं साहसं न कर्तुं शक्नोति।

## ईश्वरस्य हस्ते एव अस्ति जनानां सुरक्षा

विपिनपरमारः अवदत् यत् राज्ये पुलिसस्य कार्यं सुरक्षां निर्वोढुम् एव अस्ति। सीआईडी-संस्थायाः कार्यं गुप्तचर-सङ्ग्रहः भवति येन कस्यापि प्रकारस्य आपराधिक-षड्यंत्रस्य अथवा अप्रिय-घटनायाः ज्ञापनं कर्तुं शक्यते, तस्य नियन्त्रणार्थं पुलिसैः समये एव निवारक-कार्याणि कर्तुं शक्यते। परन्तु राज्यस्य मुख्यमन्त्री राज्यस्य गुप्तचरपुलिसं तेषां जनानां पश्चात् स्थापितवान् ये समोसानां अन्वेषणं कृतवन्तः, समोसानाम् अन्वेषणस्य वार्तां रहस्योद्घाटनं कृत्वा प्रकाशितवन्तः। तदनन्तरं मुख्यमन्त्री गुप्तचरपुलिसाय विपक्षनेतृणां कार्यालयेषु कार्येषु च, काङ्ग्रेसविधायकेषु दृष्टिपातस्य दायित्वं दत्तवान् अस्ति। राज्यस्य जनानां सुरक्षा ईश्वरस्य दयायां वर्तते।


# हमीरपुरस्य युवकस्य यमुनानद्यां निमज्जनेन मृत्युः, वृन्दावनस्य गुरुकुले अध्ययनं कुर्वन् आसीत्



हमीरपुर- उत्तरप्रदेशस्य वृन्दावनस्य गुरुकुले शिक्षां अधीयानः हमीरपुरमण्डलस्य उखलीपंचायतस्य एकः युवकः यमुना नद्यां निमज्जनेन मृतः। एषा दुर्घटना गतशुक्रवासरे होलीदिने अपराह्णे अभवत्। सः युवकः कैश्चित् मित्रैः सह यमुनानद्यां स्नानार्थं गतः आसीत्। सः नद्यां स्नानं कुर्वन् मग्नः अभवत् । तस्य सहचराः सूचनां कृतवन्तः तदनन्तरं तत्र बहवः जनाः समागताः । स्थानीयपुलिसदलम् अपि सूचितम्। युवकस्य परिवारजनानां कृते अपि सूचना दत्ता। सूचनां प्राप्य परिवारजनाः वृन्दावनं प्राप्तवन्तः। गतशनिवासरे नद्याम् अन्वेषणकाले तस्य शवः प्राप्तः। रविवासरे मृतस्य दाहसंस्कारः कृतः। युवकस्य मृत्योः कारणात् समग्रः क्षेत्रः शोकग्रस्तः अस्ति।

# अमेरिकादेशे पाकिस्तानीनां कृते 'प्रवेशः नास्ति' इति, वीजाप्रतिबन्धसूचौ ४३ देशानाम् नामानि समाविष्टानि





**हिमसंस्कृतवार्ताः।** राष्ट्रपतिः ट्रम्पः पाकिस्तानस्य अमेरिकादेशे प्रवेशं प्रतिबन्धितवान् अस्ति। न्यूयॉर्क-टाइम्स्-पत्रिकायाः प्रतिवेदनानुसारम् अधुना पाकिस्तानस्य जनानां कृते अमेरिकन-वीजा न दीयते । ट्रम्पः ४३ देशेषु एतादृशं प्रतिबन्धं कृतवान् । अस्मिन् ११ देशाः रक्तसूचौ, १० देशाः नारङ्गसूचौ, २२ देशाः पीतसूचौ स्थापिताः सन्ति । एवं नूतनयात्राप्रतिबन्धस्य प्रतिवेदनसूच्यां ट्रम्पः ४३ देशान् लक्ष्यं कृतवान् अस्ति । ट्रम्पप्रशासनस्य अन्तः प्रचलिते प्रतिवेदने तेषां देशानाम् त्रयः स्तराः सूचीबद्धाः सन्ति येषां नागरिकाः अमेरिकादेशे प्रवेशे प्रतिबन्धानां सम्मुखं कर्तुं शक्नुवन्ति। राष्ट्रपतिः ट्रम्पस्य प्रथमकार्यकालस्य समये स्थापितानां प्रतिबन्धानां अपेक्षया अधिकं व्यापकं भविष्यति इति ट्रम्प प्रशासनं ४३ देशानाम् नागरिकान् लक्ष्यं कर्तुं विचारयति।

## रक्त-नारङ्ग-सूचौ च एतेषां देशानाम् नामानि

रक्तसूचौ अन्तर्भूताः देशाः अफगानिस्तान, भूटान, क्यूबा, इरान्, लीबिया, उत्तरकोरिया, सोमालिया, सूडान, सीरिया, वेनेजुएला, यमन च इति अधिकारिणः अवदन्। प्रस्तावितयात्राप्रतिबन्धयुक्तानां देशानाम् प्रतिवेदनसूची ट्रम्पप्रशासनस्य आन्तरिकप्रस्तावे दत्ता अस्ति, यस्य नागरिकाः अमेरिकादेशे प्रवेशे प्रतिबन्धस्य सम्मुखं कर्तुं शक्नुवन्ति। केषाञ्चन देशानाम् अन्तिमक्रमः परिवर्तयितुं शक्नोति । प्रतिवेदनसूच्यां १० देशाः नारङ्गसूचौ स्थापिताः सन्ति । एतेषां देशानाम् नागरिकानां कृते वीजा अनुमतिः न प्रदत्ता भविष्यति। एतेषु पाकिस्तानदेशः, बेलारूस्, इरिट्रिया, हैटी, लाओस्, म्यान्मार, रूस, सियरा लियोन्, दक्षिणसूडान, तुर्कमेनिस्तान च सन्ति । एतेषां देशानाम् धनिनः व्यापारिकवर्गस्य जनाः नियमैः सह अमेरिकादेशम् आगन्तुं शक्नुवन्ति। अन्यः कोऽपि प्रकारः वीजापत्रम् न निर्गतः भविष्यति।

## पीतसूचौ समाविष्टाः देशाः

पीतसूचौ अङ्गोला, एण्टिगुआ एण्ड् बार्बुडा, बेनिन्, बुर्किना फासो, कम्बोडिया, कैमरून, केप वर्डे, चाड्, काङ्गो गणराज्यं, काङ्गो लोकतान्त्रिकगणराज्यं, डोमिनिका, इक्वेटोरियल गिनी, गाम्बिया, लाइबेरिया, मलावी, माली, मॉरिटानिया, सेण्ट् किट्स् तथा नेविस्, सेण्ट् लुसिया, साओ टोम एण्ड् प्रिन्सिप्, वानुअतु, जिम्बाब्वे च देशाः सन्ति एतेषां देशानाम् जनानां प्रवेशः तदा एव भविष्यति यदा ते ६० दिवसेषु अमेरिकीचिन्तानां समाधानं कुर्वन्ति।

# प्रसारभारती, हॉकी-इण्डिया-जमनलाल-शर्मापुरस्कारेण सम्मानिता

**हिमसंस्कृतवार्ताः।** नवदिल्ल्याम् आयोजिते हॉकी-इण्डिया-सप्तम-वार्षिक पुरस्काराः-विंशति-चतुर्विंशतिः इत्यस्मिन् स्वस्य अमूल्ययोगदानस्य कृते प्रसारभारती, हॉकी-इण्डिया-जमनलाल-शर्मापुरस्कारेण सम्मानिता । एषः पुरस्कारः राष्ट्र हॉकीक्रीडायाः प्रचार-प्रसारणे प्रसारभारत्याः अमूल्ययोगदानं प्रयासं च चिह्नीकरोति । समारोहेऽस्मिन् हॉकी-इण्डिया संस्थया, हॉकी-इण्डिया-मेजर-ध्यानचन्द-आजीवन-उपलब्धिपुरस्कारेण पञ्चाशत्-लक्षरूप्यकाणां धनराशिपुरस्सरं, पञ्चसप्तत्यधिक-नवदशशत-तमे वर्षे विश्वचषकस्य विजयी-दलस्य सदस्यानाम् अभिनन्दनं कृतम् । शीर्षसम्मानितेषु सविता-पुनिया, हरमनप्रीतसिंहः च महिला-पुरुष-वर्गेषु विंशति-चतुर्विंशति-तमवर्षस्य उत्तम-क्रीडक-रूपेण हॉकी-इण्डिया-बलबीरसिंह-वरिष्ठ-पुरस्कारेण सम्मानितौ। स्ववक्तव्ये प्रसारभारत्याः अध्यक्षः नवनीत-सेहगलः उक्तवान् यत् देशे सर्वत्र हॉकी-क्रीडायाः प्रसारप्रचारः प्रसारभारत्याः मुख्योद्देश्यं वर्तते।

# ''मनोवस्था'' {बोधकथा}

एकः धनी पुरुषः गुरुं भोजनार्थं स्वगृहे निमन्त्रितवान्। किन्तु एकादश्या उपवासकारणेन गुरुः भोजनार्थं न गतवान्। किन्तु स्वस्य द्वौ शिष्यौ धनिकस्य गृहं प्रेषितवान्। यदा शिष्यौ प्रत्यागतौ तदा एकः शिष्यः दुःखी, अपरः शिष्यः प्रसन्नः च। गुरुः आश्चर्यचकितः पृष्टवान् किमर्थं त्वं दुःखी असि? धनीजनेन भोजने भेदं कृतं वा? शिष्यः उक्तवान्- न न आचार्यः। तेन दक्षिणां दातुं भेदं कृतं किम्? शिष्यः अवदत्- न न आचार्यः। धनीजनेन आवयोः द्वे रुप्यके दत्तः। तर्हि किमर्थं त्वं दुःखी असि?
तदा शिष्यः उक्तवान्- सः व्यक्ति बहु धनवान् तर्हि मम चिन्तनं न्यूनातिन्यूनं दशरुप्यकाणि दक्षिणा दास्यति किन्तु सः केवलः द्वे रुप्यके अददात्। एतस्मिन् कारणेन अहं दुःखी अस्मि।
आचार्यः अपरं शिष्यं पृष्टः- त्वं किमर्थं प्रसन्न असि? तदा शिष्यः अवदन्- अहं जानामि धनीजनः महानकृपणः तर्हि तेन द्वे रुप्यके दक्षिणा दत्तः। अहं चिन्तितवान् सः केवलं पञ्चाशत् नाणकं दास्यति किन्तु तेन द्वे रुप्यके दत्ते। अतः अहं प्रसन्नः। अस्माकं मनोवस्था एतादृशी एव। संसारे प्रतिदिनं किमपि प्रसङ्गम् आगच्छति किन्तु केचन जनाः सुखं प्राप्नुवन्ति केचन जनाः दुःखं च। किन्तु सुखं अथवा दुःखं अस्माकं मनस्थित्योऽपरि अस्ति। इच्छा सम्पूर्णा चेत् सुखं इच्छा अपूर्णा चेत् दुःखम्। इच्छा नास्ति चेत् आनन्दम्। सुन्दराणि सन्ति कर्माणि, संस्काराः, विचाराः तस्य वाणी च। यस्य संस्कारः, कर्मः चारित्र्यं, विचारः जीवने उत्तमः अस्ति सैव सुन्दरः।

**डॉ. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# इन्दिरागांधिप्रियभगिनीयोजनायां अधुनापर्यन्तं ३०९२९ महिलाः लाभान्विताः




**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशराज्यस्य आर्थिकरूपेण दरिद्रमहिलानां जीवनस्तरोन्नयनाय सर्वकारेण इन्दिरागांधीप्रियभगिनीसुख-सम्मान निधियोजना आरब्धा अस्ति। अस्याः योजनायाः अन्तर्गतं हिमाचलप्रदेशसर्वकारः राज्यस्य आर्थिकदृष्ट्या दुर्बलमहिलानां कृते प्रतिमासं १५०० रुप्यकाणां आर्थिकसहायतां प्रयच्छति। अस्मिन् वर्षे हिमाचलसर्वकारस्य आर्थिकसर्वेक्षणप्रतिवेदनानुसारम् एतावता राज्ये ३०,९२९ महिलाः लाभं प्राप्तवत्यः। परन्तु अद्यापि सहस्राणि आवेदनानि लम्बितानि सन्ति। अस्याः योजनायाः अन्तर्गतं राज्यसर्वकारेण प्रदत्तानां १५०० रुप्यकाणां राशिः डीबीटी मार्गेण प्रत्यक्षतया लाभार्थीमहिलानां वित्तकोषसंख्यासु स्थानान्तरिता भवति । राज्यसर्वकारस्य एतेन साहाय्येन महिलाः स्ववित्तीय आवश्यकताः पूरयितुं समर्थाः भविष्यन्ति।
राज्यस्य निर्धनाः महिलाः या आर्थिक रूपेण दुर्बलाः, धनस्य अभावात् जीवनं यापयितुम् अशक्ताः सन्ति तासां कृते एषा योजना आरब्धा अस्ति । १८ तः ५९ वर्षाणां आयुवर्गस्य महिलाः ये हिमाचलप्रदेशस्य स्थायिनिवासिन्यः सन्ति तथा च यासां परिवारस्य सदस्याः केन्द्रीयसेवायां तथा राज्यसर्वकारस्य कर्मचारिणः, पेंशनभोगिनः, अनुबन्धकर्मचारिणः, आउटसोर्सकार्यकर्तारः, दैनिकश्रमिकाः, अंशकालिककर्मचारिणः इत्यादयः, सेवारताः, पूर्वसेवकाः तथा सेनिकानां विधवाः, मानदं प्राप्तकर्तृयः आंगनवाडीश्रमिकाः, सहायिकाः, आशाकार्यकर्तारः, मध्याह्नभोजने कार्यकर्ता, सामाजिकसुरक्षापेंशन लाभार्थी, पंचायतीराजसंस्थानस्य कर्मचारी, नगरीयनिकायस्य, विभिन्न सार्वजनिकक्षेत्राणां उपक्रमस्य, बोर्डस्य, परिषदः, केन्द्रस्य तथा राज्यसर्वकारस्य अंतर्गतं संस्थासु सेवारताः, पेंशनभोगी, वस्तु एवं सेवाकरे पंजीकृताः आयकरदाता, इत्यादयः महिलाः योजनायां समाविष्टाः न भविष्यन्ति।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# उपनिषद्-रहस्यम्- ०१

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।। ॐ शान्तिः शान्तिः शान्तिः!**

अखिले ब्रह्माण्डे जडचेतनात्मकं यत् किमपि वस्तु विद्यमानमस्ति, तत्सर्वं परमेश्वरेण व्याप्तमस्ति। तमीश्वरं विज्ञाय त्यागपूर्वकं, जगति स्थितं वस्त्वादिकम्, अनासक्ततया भोक्तव्यम्, यतोहि धनादिभोग्यवस्तु न कस्यापि स्वकीयं वर्तते। शास्त्रविहितानि कर्माणि कुर्वन् मनुष्यः शतवर्षाणि यावत् जीवितुम् इच्छां कुर्यात्। एवं प्रकारेण त्यागभावेन ईश्वरोद्देश्येन च कृतं कर्म तस्मिन् मनुष्ये लिप्तं न भवति, अर्थात् तत् तस्य कृते बन्धनकारकं न भवति। अन्यथा मुक्तिप्राप्तये एतदतिरिच्य मार्गान्तरं न क्वापि विद्यते। प्रसिद्धाः आसुरिकलोकाः तु बहुधा सन्ति, नानाविधाः योनयः सन्ति, नरकनामधेयः दुःखप्रदलोकः अपि वर्तते। एते लोकाः अज्ञानक्लेशदुःखयुतेन अन्धकारेण सततम् आच्छादिताः सन्ति। ईश्वरविमुखाः, आत्महन्तारः वा मनुष्याः मरणानन्तरं तान् भयङ्करान् लोकान् अभिगच्छन्ति। सः परमेश्वरः एकः, अचलः, मनसोऽपि तीव्रगतिमान्, सर्वेषाम् आदिः, ज्ञानस्वरूपः, सर्वेषाम् अभिज्ञाता च वर्तते। इन्द्रादिदेवाः अपि तं न कदापि प्राप्तवन्तः, न वा ज्ञातवन्तः एव। परं ते देवाः, महर्षयः च तस्य परमेश्वरस्य अनुसन्धानार्थं हि सततं धावन्तः स्युः। परमेश्वरस्य सत्ताशक्त्यादिबलात् हि वायुरादिदेवाः जलवर्षणं कुर्वन्तः, जीवेभ्यः प्राणधारणशक्त्यादिकं च प्रदाय प्रवर्तमानाः सन्ति। सः परमेश्वरः चलति अपि, नहि चलति अपि, सः दूरादूरमपि वर्तते, सः अत्यन्तं समीपे अपि स्यात्। अस्य अखिले जगति सः बाह्याभ्यन्तरेषु, सर्वत्र च परिपूर्णोऽस्ति, इति।